।। শ্ৰীৰামৰক্ষাস্তোত্ৰম ।।

ধ্যায়েদাজানুবাহুং ধৃতশৰধনুষং বদ্ধপদ্মাসনস্থং
পীতং ৱাসো ৱসানং নৱকমলদলস্পৰ্ধিনেত্ৰং প্ৰসন্নম ।
ৱামাংকাৰূঢসীতামুখকমলমিলল্লোচনং নীৰদাভং
নানালংকাৰদীপ্তং দধতমুৰুজটামংডনং ৰামচংদ্ৰম ।।

চৰিতং ৰঘুনাথস্য় শতকোটিপ্ৰৱিস্তৰম ।
একৈকমক্ষৰং পুংসাং মহাপাতকনাশনম ।। ১ ।।

ধ্যাত্ৱানীলোত্পলশ্যামং ৰামং ৰাজীৱলোচনম ।
জানকীলক্ষ্মণোপেতং জটামকুটমংডিতম ।। ২ ।।

সাসিতূণধনুৰ্বাণপাণিং নক্তংচৰাংতকম ।
স্ৱলীলয়া জগত্ৰাতুমাৱিৰ্ভূতমজং ৱিভুম ।। ৩ ।।

ৰামৰক্ষাং পঠেত প্ৰাজ্ঞঃ পাপঘ্নীং সৰ্ৱকামদাম ।
শিৰো মে ৰাঘৱঃ পাতু ফালং দশৰথাত্মজঃ ।। ৪ ।।

কৌসল্যেয়ো দৃশৌ পাতু ৱিশ্ৱামিত্ৰপ্ৰিয়ঃ শ্ৰুতী ।
ঘ্ৰাণং ত্ৰাতু মখত্ৰাতা মুখং সৌমিত্ৰিৱত্সলঃ ।। ৫ ।।

জিহ্ৱাং ৱিদ্যানিধিঃ পাতু কংঠং ভৰতৱংদিতঃ ।
স্কংধৌ দিৱ্যায়ুধঃ পাতু ভুজৌ ভগ্নেশকাৰ্মুকঃ ।। ৬ ।।

কৰৌ সীতাপতিঃ পাতু হৃদয়ং জামদগ্ন্যজিত ।
মধ্যং পাতু খৰধ্বংসী নাভিং জাংবৱদাশ্ৰয়ঃ ।। ৭ ।।

সুগ্ৰীৱেশঃ কটিং পাতু সক্থিনী হনুমত্প্ৰভুঃ ।
ঊৰূ ৰঘূত্তমঃ পাতু ৰক্ষঃকুলৱিনাশকৃত ।। ৮ ।।

জানুনী সেতুকৃত পাতু জংঘে দশমুখাংতকঃ ।
পাদৌ ৱিভীষণশ্ৰীদঃ পাতু ৰামোঽখিলং ৱপুঃ ।। ৯ ।।

এতাং ৰামবলোপেতাং ৰক্ষাং য়ঃ সুকৃতী পঠেত ।
স চিৰায়ুঃ সুখী পুত্ৰী ৱিজয়ী ৱিনয়ী ভৱেত ।। ১০ ।।

পাতালভূতলৱ্যোমচাৰিণশ্ছদ্মচাৰিণঃ ।
ন দ্ৰষ্টুমপি শক্তাস্তে ৰক্ষিতং ৰামনামভিঃ ।। ১১ ।।

ৰামেতি ৰামভদ্ৰেতি ৰামচংদ্ৰেতি ৱা স্মৰন ।
নৰো ন লিপ্যতে পাপৈৰ্ভুক্তিং মুক্তিং চ ৱিংদতি ।। ১২ ।।

জগজ্জৈত্ৰৈকমংত্ৰেণ ৰামনাম্নাঽভিৰক্ষিতম ।
য়ঃ কংঠে ধাৰয়েত তস্য় কৰস্থাঃ সৰ্ৱসিদ্ধয়ঃ ।। ১৩ ।।

ৱজ্ৰপংজৰনামেদং য়ো ৰামকৱচং স্মৰেত ।
অৱ্যাহতাজ্ঞঃ সৰ্ৱত্ৰ লভতে জয়মংগলম ।। ১৪ ।।

আদিষ্টৱান য়থা স্ৱপ্নে ৰামৰক্ষামিমাং হৰঃ ।

তথা লিখিতৱান প্ৰাতঃ প্ৰবুদ্ধো বুধকৌশিকঃ ।। ১৫ ।।

আৰামঃ কল্পবৃক্ষাণাং ৱিআমঃ সকলাপদাম ।
অভিৰামস্ত্ৰিলোকানাং ৰামঃ শ্ৰীমান স নঃ প্ৰভুঃ ।। ১৬ ।।

তৰুণৌ ৰূপসংপন্নৌ সুকুমাৰৌ মহাবলৌ ।
পুংডৰীকৱিশালাক্ষৌ চীৰকৃষ্ণাজিনাংবৰৌ ।। ১৭ ।।

ফলমূলাশিনৌ দাংতৌ তাপসৌ ব্ৰহ্মচাৰিণৌ ।
পুত্ৰৌ দশৰথস্যৈতৌ ভ্ৰাতৰৌ ৰামলক্ষ্মণৌ ।। ১৮ ।।

শৰণ্যৌ সৰ্ৱসত্ত্ৱানাং শ্ৰেষ্ঠৌ সৰ্ৱধনুষ্মতাম ।
ৰক্ষঃকুলনিহংতাৰৌ ত্ৰায়েতাং নো ৰঘূত্তমৌ ।। ১৯ ।।

আত্তসজ্জধনুষাৱিষুস্পৃশাৱক্ষয়াশুগনিষংগসংগিনৌ ।
ৰক্ষণায় মম ৰামলক্ষ্মণাৱগ্ৰতঃ পথি সদৈৱ গচ্ছতাম ।। ২০ ।।

সন্নদ্ধঃ কৱচী খড্গী চাপবাণধৰো য়ুৱা ।
গচ্ছন মনোৰথোঽস্মাকং ৰামঃ পাতু সলক্ষ্মণঃ ।। ২১ ।।

ৰামো দাশৰথিঃ শূৰো লক্ষ্মণানুচৰো বলী ।
কাকুত্স্থঃ পুৰুষঃ পূৰ্ণঃ কৌসল্যেয়ো ৰঘূত্তমঃ ।। ২২ ।।

ৱেদাংতৱেদ্যো য়জ্ঞেশঃ পুৰাণপুৰুষোত্তমঃ ।
জানকীৱল্লভঃ শ্ৰীমান অপ্ৰমেয়পৰাক্ৰমঃ ।। ২৩ ।।

www.yousigma.com

ইত্য়েতানি জপন নিত্য়ং মদ্ভক্তঃ শ্রদ্ধয়াঽন্ৱিতঃ ।
অশ্ৱমেধায়ুতং পুণ্য়ং সংপ্রাপ্নোতি ন সংশয়ঃ ।। ২৪ ।।

ৰামং দূর্ৱাদলশ্য়ামং পদ্মাক্ষং পীতৱাসসম ।
স্তুৱংতি নামভির্দিৱ্য়ৈর্ন তে সংসাৰিণো নৰাঃ ।। ২৫ ।।

ৰামং লক্ষ্মণপূর্ৱজং ৰঘুৱৰং সীতাপতিং সুংদৰং
কাকুত্স্থং কৰুণার্ণৱং গুণনিধিং ৱিপ্রপ্রিয়ং ধার্মিকম ।
ৰাজেংদ্রং সত্য়সংধং দশৰথতনয়ং শ্য়ামলং শাংতমূর্তিং
ৱংদে লোকাভিৰামং ৰঘুকুলতিলকং ৰাঘৱং ৰাৱণাৰিম ।। ২৬ ।।

ৰামায় ৰামভদ্রায় ৰামচংদ্রায় ৱেধসে ।
ৰঘুনাথায় নাথায় সীতায়াঃপতয়ে নমঃ ।। ২৭ ।।

শ্রীৰাম ৰাম ৰঘুনংদন ৰাম ৰাম
শ্রীৰাম ৰাম ভৰতাগ্রজ ৰাম ৰাম ।
শ্রীৰাম ৰাম ৰণকর্কশ ৰাম ৰাম
শ্রীৰাম ৰাম শৰণং ভৱ ৰাম ৰাম ।। ২৮ ।।

শ্রীৰামচংদ্রচৰণৌ মনসা স্মৰামি
শ্রীৰামচংদ্রচৰণৌ ৱচসা গৃণামি ।
শ্রীৰামচংদ্রচৰণৌ শিৰসা নমামি
শ্রীৰামচংদ্রচৰণৌ শৰণং প্রপদ্য়ে ।। ২৯ ।।

www.yousigma.com

মাতা ৰামো মত্পিতা ৰামচংদ্ৰঃ
স্ৱামি ৰামো মত্সখা ৰামচংদ্ৰঃ ।
সৰ্ৱস্ৱং মে ৰামচংদ্ৰো দয়ালুঃ
নান্য়দ দৈৱং নৈৱ জানে ন জানে ।। ৩০ ।।

দক্ষিণে লক্ষ্মণো য়স্য় ৱামে তু জনকাত্মজা ।
পুৰতো মাৰুতিৰ্য়স্য় তং ৱংদে ৰঘুনংদনম ।। ৩১ ।।

লোকাভিৰামং ৰণৰংগধীৰং ৰাজীৱনেত্ৰং ৰঘুৱংশনাথম ।
কাৰুণ্য়ৰূপং কৰুণাকৰং তং শ্ৰীৰামচংদ্ৰং শৰণং প্ৰপদ্য়ে ।। ৩২ ।।

মনোজৱং মাৰুততুল্য়ৱেগং জিতেংদ্ৰিয়ং বুদ্ধিমতাং ৱৰিষ্ঠম ।
ৱাতাত্মজং ৱানৰয়ূথমুখ্য়ং শ্ৰীৰামদূতং শৰণং প্ৰপদ্য়ে ।। ৩৩ ।।

কূজংতং ৰাম ৰামেতি মধুৰং মধুৰাক্ষৰম ।
আৰুহ্য় কৱিতাশাখাং ৱংদে ৱাল্মীকিকোকিলম ।। ৩৪ ।।

আপদামপহৰ্তাৰং দাতাৰং সৰ্ৱসংপদাম ।
লোকাভিৰামং শ্ৰীৰামং ভূয়ো ভূয়ো নমাম্য়হম ।। ৩৫ ।।

ভৰ্জনং ভৱবীজানামাৰ্জনং সুখসংপদাম ।
তৰ্জনং য়মদূতানাং ৰামৰামেতি গৰ্জনম ।। ৩৬ ।।

ৰামো ৰাজমণিঃ সদা ৱিজয়তে ৰামং ৰমেশং ভজে
ৰামেণাভিহতা নিশাচৰচমূ ৰামায় তস্মৈ নমঃ ।

www.yousigma.com

ৰামান্নাস্তি পৰায়ণং পৰতৰং ৰামস্য় দাসোঽস্ম্য়হং
ৰামে চিত্তলয়ঃ সদা ভৱতু মে ভো ৰাম মামুদ্ধৰ ।। ৩৭ ।।

শ্ৰীৰাম ৰামেতি ৰমে ৰামে মনোৰমে ।
সহস্ৰনাম তত্তুল্য়ং ৰামনাম ৱৰাননে ।। ৩৮ ।।

।। ইতি বুধকৌশিকসংগৃহীতং শ্ৰীৰামৰক্ষাস্তোত্ৰম ।।

www.yousigma.com